# A-II/1/2395/21

## चतुर्थसत्रार्द्धम्

## प्रथमपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. तत्त्वसङ्ग्रहस्य कर्ता कः?
2. तत्त्वसङ्ग्रहे कति परिच्छेदाः?
3. शब्दार्थपरीक्षायां कति कारिकाः सन्ति?
4. आचार्यशान्तरक्षितः तिब्बतदेशे केन नाम्ना व्यवह्रियते?
5. आचार्यशान्तरक्षितेन तिब्बतदेशे कस्य महाविहारस्य स्थापना कृता?

**अथवा**

आचार्यशान्तरक्षितस्य कति ग्रन्थाः?

6. शान्तरक्षितः कस्य बौद्धदर्शनसम्प्रदायस्य प्रवर्तकः?

**अथवा**

शब्दार्थपरीक्षायां पूर्वपक्षे कतीनाम् आचार्याणाम् उल्लेखः अस्ति?

7. बौद्धमते शब्दार्थसम्बन्धः भवति न वा?

**अथवा**

बाह्यरूपं काल्पनिकं वास्तविकं वा? बौद्धदिशा सूचयत।

8. अपोहः कतिविधः? नामानि लिखत।
9. पाठ्यग्रन्थस्य मङ्गलपद्ये कस्य स्तवनं कृतमस्ति?
10. प्रत्यक्षस्य प्रमाणस्य विषयः कः?
11. बौद्धमते कति प्रमाणानि?
12. तत्त्वसङ्ग्रहदिशा कति प्रमेयाणि? नामानि लिखत।

13. आचार्यकुमारिलः केन दर्शनसम्प्रदायेन सम्बद्धः? तत्त्वसङ्ग्रहदिशा सूचयत।

**अथवा**

आगमप्रमाणं बौद्धाः स्वीकुर्वन्ति मीमांसका वा?

14. तत्त्वसङ्ग्रहदिशा गुणसिद्धिः जायते न वा? सूचयत।

**अथवा**

सत्यद्वयदिशा शब्दार्थसम्बन्धः कीदृशः?

15. विकल्पः कः?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. स्वस्मृत्या पाठ्यांशतः एकां कारिकां विलिख्य संस्कृगिरा सप्रसङ्गं व्याख्यात।

17. कारिकायाः सप्रसङ्गव्याख्या कार्या –

इत्यादिना प्रभेदने विभिन्नार्थनिबन्धनाः।
व्यावृत्तयः प्रकल्प्यन्ते तन्निष्ठाः श्रुतयस्तथा॥

18. सप्रसङ्गव्याख्यां कुरुत –

स्वबीजानेकविश्लिष्टवस्तुसङ्केतशक्तितः।
विकल्पास्तु विभिद्यन्ते तद्रूपाध्यवसायिनः॥

**अथवा**

वक्तृश्रोत्रोर्न हि ज्ञानं वेद्यते तत्परस्परम्।
सङ्केते न च तदृष्टं व्यवहारे समीक्ष्यते॥

19. सप्रसङ्गं व्याख्येयम् –

एक प्रत्यवमर्शे हि केचिदेवोपयोगिनः।
प्रकृत्य भेदकत्वेऽपि नान्य इत्युपपादितम्॥

**अथवा**

यस्य तर्हि न बाह्योऽर्थोऽप्यन्यथावृत्त इष्यते।
बन्ध्यासुतादिशब्दस्य तेन क्वाऽपोह उच्यते॥

20. सप्रसङ्ग व्याख्या विधेया –

तादृक्प्रत्यवमर्शश्च विद्यते यत्र वस्तुनि।
तत्राभावेऽपि गोजातेरगोऽपोहः प्रवर्तते॥

**अथवा**

सर्वे धर्मा निरात्मानः सर्वे वा पुरुषा गताः।
सामस्त्यं गम्यते तत्र कश्चिदंशस्त्वोपह्यते॥

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. तत्त्वसङ्ग्रहस्य वैशिष्ट्यमधिकृत्य निबन्धमेकम् उपनिबद्धीकुरुत।

**अथवा**

आचार्यशान्तरक्षितस्य व्यक्तित्वं कृतित्वमधिकृत्य एकं निबन्धं लिखत।

# A-II/2/2396/21

**चतुर्थसत्रार्द्धम्**

**द्वितीयपत्रम्**

**बौद्धदर्शनम्**

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. प्रमाणवार्तिकस्य कर्ता कः?
2. प्रमाणवार्तिके कति परिच्छेदाः?
3. प्रमाणवार्तिकस्य द्वितीय-परिच्छेदे कति कारिकाः?
4. मानं कतिविधम्? नामानि लिखत।
5. प्रमेयं कतिविधम्? नामानि लिखत।
6. स्वलक्षणं कस्य विषयः?

**अथवा**

अनुमानस्य विषयः कः?

7. प्रमाणस्य लक्षणं किम्? लिखत।
8. परमार्थसत् किम्? पाठ्यांशदिशा लिखत।

**अथवा**

स्वलक्षणं संवृतिसत् भवति न वा?

9. प्रमाणवार्तिककारस्य अपरे ग्रन्थाः के? नामानि लिखत।
10. बौद्धमते कति प्रमाणानि? नामानि लिखत।
11. प्रत्यक्षं कतिविधम्? बौद्धदिशा सूचयत।
12. प्रमाणवार्तिकस्य टीकाकारस्य भाष्यकारस्य वा कमप्येकस्य नामोल्लेखं कुरुत।
13. आचार्यधर्मकीर्तिः युक्त्यनुयायिविज्ञानवादी आगमानुयायी वा?

**अथवा**

'अज्ञातार्थप्रकाशो वा' इत्यस्य तात्पर्यं किम्? पाठ्यग्रन्थदिशा स्पष्टीकुरुत।

14. सत्यं कतिविधम्? बौद्धदिशा नामोल्लेखपूर्वकं सूचयत।

**अथवा**

बौद्धमते शब्दप्रमाणम् अस्ति न वा?

15. स्वसंवेदनं किम्? बौद्धदिशा सूचयत।

**अथवा**

आचार्यधर्मकीर्तिः कति विज्ञानानि स्वीकरोति?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. स्वस्मृतया पाठ्यांशतः एकां कारिकां विलिख्य सम्यग् व्याख्यात।

17. सप्रसङ्गव्याख्येयम् –

मानं द्विविधं मेयद्वैविध्यात् शक्त्यशक्तितः।
अर्थक्रियायां केशादिर्नार्थोऽनर्थादिमोक्षतः॥

18. सप्रसङ्गव्याख्याविधेया –

अर्थक्रियासमर्थं यत् तदत्र परमार्थसत्।
अन्यत् संवृतिसत् प्रोक्तं ते स्वसामान्यलक्षणे॥

**अथवा**

यथा भावेऽप्यभावाख्यां यथाकल्पनमेव वा।
कुर्यादशक्तेः शक्तेः वा प्रधानादिश्रुतिं जनाः॥

19. सप्रसङ्गव्याख्यां कुरुत –

केशादयो न सामान्यमनर्थाभिनिवेशतः।
ज्ञेयत्वेन ग्रहाद् दोषो नाभावेषु प्रसज्यते॥

**अथवा**

ताभ्यां तदन्यदेव स्यात् यदि रूपं समं तयोः।
तयोरिति न सम्बन्धो व्यावृत्तिस्तु न दुष्यति॥

20. सप्रसङ्गव्याख्येयम् –

असम्बन्धिनि नामादावर्थे स्यादप्रवर्तनम्।
सारूप्याद् भ्रान्तितो वृत्तिरर्थे चेत्स्यान्न सर्वदा॥

**अथवा**

याप्यभेदानुगा बुद्धिः काचिद् वस्तुद्वये क्षणे।
सङ्केतेन विना सार्थप्रत्यासत्तिनिबन्धना॥

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. प्रत्यक्षपरिच्छेदस्य विषयवस्तु प्रतिपादयत।

**अथवा**

आचार्यधर्मकीर्तेः परिचयपुरस्सरं बौद्धन्याये तदीययोगदानं वर्णयत।

# A-II/3/2397/21

## चतुर्थसत्रार्द्धम्

## तृतीयपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. शून्यवादस्य अपरनाम किम्?
2. शून्यवादस्य प्रवर्तकः कः?
3. माध्यमिककारिकायाः रचनाकारः कः?
4. माध्यमिककारिकायाः प्रकरणानि कैः नामभिः व्यवह्रीयन्ते?
5. अधीतग्रन्थस्य द्वाविंशतितमस्य प्रकरणस्य नाम किम्?

**अथवा**

आर्यसत्यपरीक्षायाः प्रथमां कारिकां लिखत।

6. आर्यसत्यानि कति? कानि च तानि?
7. 'तथागतः' सर्वज्ञो भवति न वा?

**अथवा**

तथागतानां स्कन्धाः भवन्ति न वा? ग्रन्थदिशा लिखत।

8. स्कन्धपञ्चकं लिखत।
9. दु:खे सुखसंज्ञा कथं विधीयते?

**अथवा**

युक्तिषड्वर्गाः के सन्ति?

10. शाश्वताशाश्वतादिः चतुष्टयं लिखत।

**अथवा**

किमर्थं जनाः न पश्यन्ति तथागतम्?

11. जगतः स्वभावः कीदृशः? पाठ्यग्रन्थदिशा लिखत।

12. प्रसन्नपदावृत्तिः कस्य ग्रन्थस्य? कः वृत्तिकारः? सूचयत।

13. चत्वारि-आर्यफलानि कानि? विवृतिं कुरुत।

**अथवा**

सकृदागामिफलम् किम्?

14. त्रीणि रत्नानि कानि? लिखत।

15. प्रतीत्यसमुत्पादस्य योऽर्थः, स एव शून्यता शब्दस्यार्थः इति सत्यमसत्यं वा?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. "बुद्धः स्कन्धानुपादाय यदि नास्ति स्वभावतः।
स्वभावतश्च यो नास्ति कुतः स परभावतः॥"
-कारिकायाः सप्रसङ्गं व्याख्या विधेया।

17. व्याख्या कुरुत -
तथागतो यत्स्वभावस्तत्स्वभावमिदं जगत्।
तथागतो निःस्वभावो निःस्वभावमिदं जगत्॥

**अथवा**

तथागतपरीक्षायाः सारांशं लिखत।

18. आर्यसत्यपरीक्षायाः सारांशं लिखत।

**अथवा**

व्याख्या विधेया -
यदि शून्यमिदं सर्वमुदयो नास्ति न व्ययः।
चतुर्णामार्यसत्यानामभावस्ते प्रसज्यते॥

19. माध्यमिकदर्शनस्य वर्णनं कुरुत।

**अथवा**

स्वस्मृत्या पाठ्यांशतः एकां कारिकां विलिख्य सप्रसङ्गं व्याख्यां कुरुत।

20. सप्रसङ्गव्याख्यां कुरुत –

द्वे सत्ये समुपाश्रितबुद्धानां धर्मदेशिनाम्।
लोकसंवृतिसत्यं च सत्यं च परमार्थतः॥

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. बौद्धदर्शने आचार्यनागार्जुनस्य योगदानमधिकृत्य निबन्धमेकं लिखत।

**अथवा**

तथागतपरीक्षायाः विषयवस्तु विवेचयत।

# A-II/4/2398/21

## चतुर्थसत्रार्द्धम्

## चतुर्थपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. बोधिचर्यावतार कस्य बौद्धदर्शनसम्प्रदायस्य ग्रन्थोऽस्ति ?
2. बोधिचर्यावतारे कति परिच्छेदाः सन्ति ?
3. प्रज्ञापारमिता – परिच्छेदे कति कारिकाः सन्ति ?
4. स्वस्मृत्या पाठ्यांशतः एकां कारिकां लिखत। सा कारिका प्रश्नपत्रेऽस्मिन् नागता स्यात्।
5. कति पारमिताः ? पाठ्यग्रन्थदिशा सूचयत।
6. 'परिकर' शब्दस्य कोऽर्थः ? ग्रन्थदिशा सूचयत।

**अथवा**

दु:खनिवृत्तिकाङ्क्षया काम् उत्पादयेत् ? पाठ्यांशदिशा लिखत।

7. भगवता बुद्धेन प्रज्ञार्थं किम् उपदिष्टम् ? पाठ्यांशदिशा लिखत।

**अथवा**

प्रज्ञा कतिविधा ? ग्रन्थदिशा लिखत।

8. सत्यद्वयं किम् ? पाठ्यांशदिशा सूचयत।
9. अविद्या, मोहः, विपर्यास इति कस्य पर्यायाः ? ग्रन्थदिशा सूचयत।
10. संवृतिः कतिविधा ? पाठ्यांशदिशा लिखत।

**अथवा**

परमार्थस्य पर्यायाः के ?

11. योगिलोकेन कः बाध्यते ?

**अथवा**

योगिनः केन बाध्यन्ते ?

12. योगिलोकयोः कः विवादः?

**अथवा**

पञ्चस्कन्धाः परमार्थतः क्षणिका अक्षणिका वा?

13. यावत्प्रत्यय................वर्तते। रिक्तस्थानं पूरयत।

14. मायाचित्तं किमर्थं न सम्भवः? ग्रन्थदिशा सूचयत।

15. माध्यमिकानां मते कर्मफलसम्बन्धः भवति न वा?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः। (5×6=30)**

16. स्वस्मृत्या पाठ्यांशतः एकां कारिकां विलिख्य सप्रसङ्गव्याख्यां कुरुत। सा कारिका प्रश्नपत्रेऽस्मिन् नागता स्यात्।

17. व्याख्या कार्या –

संवृतिः परमार्थश्च सत्यद्वयमिदं मतम्।
बुद्धेरगोचरस्तत्त्वं बुद्धिः संवृतिरुच्यते॥

18. सप्रसङ्गव्याख्या कार्या –

तत्र लोको द्विधा दृष्टो योगी प्राकृतकस्तथा।
तत्र प्राकृतको लोको योगिलोकेन बाध्यते॥

**अथवा**

दन्तकेशनखा नाहं नास्थि नाप्यस्मि शोणितम्।
न सिङ्घाणं न च श्लेष्मा न पूयं लसिकापि वा॥

19. सप्रसङ्गव्याख्येयम् –

लोकेन भावा दृश्यन्ते कल्प्यन्ते चापि तत्त्वतः।
न तु मायावदित्यत्र विवादो योगिलोकयोः॥

**अथवा**

कर्म कृत्वा विनष्टे हि फलं कस्य भविष्यति।
द्वयोरप्यावयोः सिद्धे भिन्नाधारे क्रियाफले॥

20. व्याख्यां कुरुत –

यावत् प्रत्ययसामग्री तावन्मायापि वर्तते।

दीर्घसन्तानमात्रेण कथं सत्त्वोऽस्ति सत्यतः॥

**अथवा**

यथैव कदलीस्तम्भो न कश्चिद् भागशः कृतः।

तथाहमप्यसद्भूतो मृग्यमाणो विचारतः॥

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. आर्यशान्तिदेवस्य व्यक्तित्वं कृतित्वमधिकृत्य निबन्धमेकं लिखत।

**अथवा**

पाठ्यांशस्य विषयवस्तु विवेचयत।

# A-II/5/2399/21

## चतुर्थसत्रार्द्धम्

## पञ्चमपत्रम्

## बौद्धदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. आर्यसत्यानि कानि? लिखत।
2. अनुपिटकं किम्? लिखत।

**अथवा**

सुत्तपिटके कति निकायाः? नामानि लिखत।

3. योगाचारसम्प्रदायः बाह्यार्थं मन्यते न वा?
4. असङ्गः कस्य दर्शनसम्प्रदायस्य आचार्यः? लिखत।
5. 'धम्मपदः' कस्य निकायस्य ग्रन्थोऽस्ति?

**अथवा**

खुद्दकनिकाये कति ग्रन्थाः? सूचयत।

6. प्रथम-सङ्गीतिः केषामाध्यक्ष्ये सम्पन्ना जाता?

**अथवा**

तृतीया-सङ्गीतिः केषामाध्यक्ष्ये सम्पन्ना जाता?

7. तृतीयधर्मचक्रप्रवर्तनं कुत्र जातम्? लिखत।
8. कतिवैपुल्यसूत्राणि? सूचयत।

**अथवा**

वेदना कतिधा? लिखत।

9. आयतनानि कति?
10. आर्यशान्तिदेवस्य ग्रन्थाः कति? नामानि लिखत।

**अथवा**

सिद्धार्थस्य पितुः नाम किम्? लिखत।

11. रत्नत्रयं किम्? लिखत।

12. कति स्कन्धाः? नामानि लिखत।

13. वेदनानिरोधात् कस्य निरोधो भवति? सूचयत।

14. न्यायबिन्दुकारः कः? लिखत।

15. पञ्चेन्द्रियाणि कानि-कानि? नामानि लिखत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. प्रतीत्यसमुत्पादस्य वर्णनं कुरुत।

17. कति ब्रह्मविहाराः? के च ते? वर्णयत।

18. प्रत्यक्षप्रमाणस्य वर्णनं बौद्धदिशा कुरुत।

**अथवा**

स्वस्मृत्या माध्यमिककारिकातः एकां कारिकां विलिख्य सम्यग् व्याख्यां कुरुत।

19. पालिभाषायां स्वस्मृत्या एकां कारिकां विलिख्यं पालिभाषया अथवा संस्कृतभाषया व्याख्यां कुरुत।

**अथवा**

सौत्रान्तिकसम्प्रदायस्य वैशिष्ट्यं प्रतिपादयत।

20. आचार्यधर्मकीर्तेः कति ग्रन्थाः? तेषां संक्षेपेण परिचयो देयः।

**अथवा**

'शून्यता' शब्दस्य कोऽर्थः? बौद्धदिशा प्रतिपादयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. महायानसाहित्यस्य वर्णनं कुरुत।

**अथवा**

त्रिपिटकस्य परिचयो देयः।